# Shri Gurumahimna Stotram

# શ્રીગુરુમહિમ્નસ્તોત્રમ્

## Document Information

Text title : Shri Gurumahimna Stotram

File name : gurumahimnastotram.itx

Category : deities_misc, gurudev, nimbArkAchArya

Location : doc_deities_misc

Author : AmaraprasAda Bhattacharya

Proofread by : Mohan Chettoor

Latest update : January 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2023

*sanskritdocuments.org*

# શ્રીગુરુમહિમ્નસ્તોત્રમ્

(શ્રીઅમરપ્રસાદભટ્ટાચાર્યવિરચિતમ્)
નમઃ શ્રીગુરવે નિત્યં નમોઽસ્તુ ગુરવે સદા ।
અજ્ઞાનધ્વાન્તસમ્મગ્નં યો મામુદ્ધૃતવાન્ મુદા ॥ ૧॥

શ્રી કૃષ્ણ કૃપયા નૂનં પ્રાપ્તવાનસ્મિ ત્વાં વિભો ।
કૃષ્ણરૂપો ભવાન્ હ્યેતદ્ વિસ્મરેયં ન જાતુચિત્ ॥ ૨॥

દેહિ ત્વચ્ચરણ દ્વન્દ્વે ભક્તિ પ્રેમ્ણોજ્જિતં સદા ।
તત્ત્વજ્ઞાનપ્રદાનેન ચક્ષુરુન્મીલિતં કુરુ ॥ ૩॥

નાસ્તિ પારો મહિમ્નસ્તે નાસ્તિ તુલા તવ ક્વચિત્ ।
નાસ્તિ સીમા ગુરુત્વસ્ય ત્વં નામ્ના કાર્યતો ગુરુઃ ॥ ૪॥

યેન સન્દર્શિતં વિષ્ણોઃ સર્વવ્યાપ્તં પરં પદમ્ ।
દગ્ધ્વા વિદ્યાં પરં જ્ઞાનં દત્તં યેન નમોઽસ્તુતે ॥ ૫॥

નિમ્બાર્કસમ્પ્રદાયો યઃ કૃષ્ણોપાસનતત્પરઃ ।
સદા ગુર્વૈકનિષ્ઠઃ સન્ રાજતે ધરણીતલે ॥ ૬॥

રામદાસો યતિશ્રેષ્ઠ પ્રાદુર્વભુવ તત્ર તુ ।
“કાઠિયા”નામતઃ ખ્યાતો યોગી બ્રહ્મવિદા વરઃ ॥ ૭॥

પરાત્પરઃ ગુરું ત્વઞ્ચ ભવસંસારતારકમ્ ।
રામદાસં સદા વન્દે ભક્ત્યા પરમયા મુદા ॥ ૮॥

તચ્છિષ્યઃ સન્તદાસો યસ્ત્યાગી સત્ય પરાયણઃ ।
ગુરુસેવી ગુરુપ્રેમી સત્તમો બ્રહ્મવિત્તમઃ ॥ ૯॥

શાસ્ત્રગ્રન્થપ્રણેતા ચ ઇષ્ટ વિગ્રહસ્થાપકઃ
તં નોમિ સતતં ભક્ત્યા સન્તદાસં પરં ગુરુમ્ ॥ ૧૦॥

સન્તદાસસ્ય શિષ્યો યઃ સન્તદાસપ્રિયઙ્કરઃ .. ..

“કાઠિયા” નામ પ્રખ્યાતો હ્યસ્મિન્ ભારતમણ્ડલે ॥ ૧૧॥

તં ધનઞ્જયદાસઞ્ચ ગુરું વન્દે હ્યનિર્નિશમ્ ।
શરણઞ્ચ સદા યામિ નિત્યં ગુર્વાત્મદૈવતઃ ॥ ૧૨॥

બ્રહ્માનન્દામૃતાસ્વાદી દેહાત્મબુદ્ધિવર્જિતઃ ।
ઈશાર્પિતમનઃપ્રાણો યોઽહં વોધવિવર્જિતઃ ॥ ૧૩॥

યદ્વપુદર્શનેનૈવ-તાપશાન્તિઃ પ્રજાયતે ।
ચિત્તહ્લાદકરં તઞ્ચ પ્રણમામિ સદાગુરુમ્ ॥ ૧૪॥

પરમેશે સદા રક્તં યતિવરમનુત્તમમ્ ।
નિશ્ચિન્તં પરમાનન્દં ચિત્તશાન્તિ પ્રદાયકમ્ ॥ ૧૫
વાસુદેવસ્વરૂપં તં જગન્મઙ્ગલ વિગ્રહમ્ ।
આવિર્ભૂત નરાધારે ગુરું બ્રહ્મ નમામ્યહમ્ ॥ ૧૬॥

જીવોદ્ધારવ્રતે યુક્તો ભગવચ્છક્તિધારકઃ ।
જીવાનુદ્ધરતે યશ્ચ કરુણાપૂર્ણમાનસઃ ॥ ૧૭॥

સદાપ્રશાન્તચિત્તો યો વાસુદેવપરાયણઃ
તં નૌમિ સતતં ભક્તયા પરમાનન્દસદ્ગુરુમ્ ॥ ૧૮॥

સઙ્ગોપિતાત્મશક્તિર્યશ્ચરતિ લોકવત્ સદા ।
તં ગુરું સતતં વન્દે મમત્વબુદ્ધિર્વાજિતમ્ ॥ ૧૯॥

યોદ્વેષ્ટા સર્વભૂતાનાં સમદુઃખસુખઃ ક્ષમી ।
સમત્વયોગયુક્તં તં ગુરું વન્દે અહર્નિશમ્ ॥ ૨૦॥

શાસ્ત્રાનુશીલને નિષ્ઠં સદાચારપરાયણમ્ ।
શ્રીધનઞ્જયદાસં પ્રપદ્યેઽહં સદા ગુરુમ્ ॥ ૨૧॥

ગુરુભક્તિસમાયુક્તં ગુરોઃ પ્રિયઙ્કરં સદા ।
ધનઞ્જય ગુરું વન્દે ગુરુસેવાપરાયણમ્ ॥ ૨૨॥

ગુર્વાનન્દસદાનન્દં ગુર્વર્થે સર્વચેષ્ટિતમ્ ।
“ગુરૌ હુતામનઃ–પ્રાણં ગુરું” નૌમિ ધનઞ્જયમ્ ॥ ૨૩॥

શાસ્ત્રજ્ઞો મન્ત્રવિદ્ભક્તઃ શાસ્ત્ર વ્યાખ્યાન ક વિદઃ ।
શાસ્ત્રપ્રચારકો યશ્ચ નિમ્બાર્કપથચારણઃ ॥ ૨૪॥

નિમ્બાર્કમતવ્યાખ્યાતા દ્વૈતાદ્વૈતપ્રચારકઃ ।

(તં) ધનઞ્જયં ગુરું નોમિ જ્ઞાને ભક્તૌ પ્રતિષ્ઠિતમ્ ॥ ૨૫॥

પૂર્વાચાર્યચરિત્રાણિ યોઽલિખત્ સર્વમઙ્ગલઃ ।
પ્રાકાશયચ્ચ યસ્તાનિ જગત્કલ્યાણકાઙ્ક્ષયા ॥ ૨૬॥

સ્થાપિતવાંશ્ચ દેશેષુ દયાશ્રમાન્ ધર્મગુપ્તયે ।
સર્વહિતે રતં તઞ્ચ ભજામિ સતતં ગુરુમ્ ॥ ૨૭॥

સિદ્ધાન્તનિર્ણયે દક્ષં શાસ્ત્રાનન્દં વિમત્સરમ્ ।
શ્રોત્રિયં તં ગુરું નૌમિ અજ્ઞાનતિમિરાપહમ્ ॥ ૨૮॥

યેન પ્રજ્વલિતો જ્ઞાનપ્રદીપો હૃદિકન્દરે ।
નાશિતાઃ સંશયાઃ સર્વે છેદિતં ભવવન્ધનમ્ ॥ ૨૯॥

દર્શિતમાત્મરૂપં તત જનિતા ભગવદ્રતિઃ ।
મહિમ્નઃ સ્તવને તસ્ય કઃ સમર્થઃ કદા ભવેત્ ॥ ૩૦॥

હે ગુરો ! મહિમાનસ્તે સદા સ્ફુરન્તુ મેં હૃદિ ।
ભવતુ વિમલા ભક્તિસ્તત્પાદકમલે મમ ॥ ૩૧॥

ક્ષમાશીલઃ સદેવ ત્વં સતતં ભક્તવત્સલઃ ।
નિત્યાપરાધશીલસ્ય અપરાધાન્ ક્ષમસ્વ મે ॥ ૩૨॥

નાસ્તિ મે યોગ્યતા કાચિત્ત્વમેવ શરણં મમ ।
અશરણશરણ્યસ્ત્વં કૃપાં કુરુ મમોપરિ ॥ ૩૩॥

કેશેષુ માં ગૃહોત્વા ત્વં સંસારસાગરાન્નય
આનીય પાદપદ્મે તે સ્થાપય માં સદાઽચ્યુતમ્ ॥ ૩૪॥

નમોઽસ્તુ ગુરવે તુભ્યં સંસારાર્ણવતારક ।
સંસારસાગરે મગ્નં માં સમુદ્ધર હે ગુરો ॥ ૩૫॥

ન જાતુ વિસ્મરેયં ત્વાં ન ત્વં માં વિસ્મરેઃ ક્વચિત્ ।
ભવતાન્મે પરા ભક્તિસ્ત્વયિ જન્મનિ જન્મતિ ॥ ૩૬॥

દેહિ મે પ્રેમભક્તિં ત્વં કૃપયા સ્વાત્મસાત્ કુરુ ॥

ગુરો ! ત્વચ્ચરણદ્વન્દ્વે ભૂયો ભૂયો નમામ્યહમ્ ॥ ૩૭॥

! ! જય શ્રીરાધે ! !

ઇતિ શ્રી અમરપ્રસાદભટ્ટાચાર્યવિરચિતં

શ્રીશ્રીશ્રીગુરુમહિમ્નસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Gurumahimna Stotram*

pdf was typeset on January 7, 2023

Please send corrections to *sanskrit@cheerful.com*